तीव्रावेगः अतिदुःसहवेगः ताभ्यां आर्त्तं दुःखितम् ॥ * ॥ अन्यच्च ।
"मरणं प्राप्नुयात्तत्र शुक्रस्थानगते ज्वरे ।
शेफसः स्तब्धता मोक्षः शुक्रस्य तु विशेषतः ॥"
व्याख्यातोऽयं श्लोकः ॥ * ॥
विषमज्वरस्यारिष्टमाह ।
"आरम्भाद्विषमो यस्य यस्य वा दैर्घ्यरात्रिकः ।
क्षीणस्य चातिरूक्षस्य गम्भीरो हन्ति यस्य तम् ॥"
यस्य आरम्भाद्विषमः प्रथमोत्पत्तेरेव विषमः न तु ज्वरोत्कृष्टस्य । यस्य दैर्घ्यरात्रिको वा यस्य क्षीणस्यातिरूक्षस्य च गम्भीरो भवति तं विषमो दैर्घ्यरात्रिको गम्भीरश्च हन्तीत्यर्थः ॥ इति ज्वराधिकारः ॥ * ॥ अथ ज्वरातिसाराधिकारः ।
"ज्वरातिसारयोरुक्तं निदानं यत् पृथक् पृथक् ।
तस्माज्ज्वरातिसारस्य निदानं नोदितं पुनः ॥"
अथ ज्वरातिसारस्य चिकित्सामाह ।
"ज्वरातिसारयोरुक्तं भेषजं यत् पृथक् पृथक् ।
न तन्मिलितयोः कार्य्यमन्योन्यं वर्द्धयेत् पुनः ॥"
अयमभिप्रायः । ज्वरहरमनुलोमनं भवति । अतीसारहरं स्तम्भनं भवति । अतः परस्परविरुद्धत्वात् पृथक् उक्तं भेषजं मिलितयोर्न्न कार्य्यम् । यत आह ।
"अनुलोमनं ज्वरघ्नं ग्राहकमतिसारहृद्भवति ।
पृथगुक्तमौषधं तज्ज्वरातिसारे विरुद्धमन्योन्यम् ॥
अतस्तौ प्रतिकुर्व्वीत विशेषोक्तचिकित्सितैः ॥
लङ्घनमेकं मुक्त्वा न चान्यदस्तीह भेषजं बलिनः ।
समुदीर्णदोषनिचयं तत् पाचयेत्तथा शमयेत् ॥
लङ्घनमुभयोरुक्तं मिलिते कार्य्यं विशेषतस्तदनु ।
उत्पलषष्ठकसिद्धं लाजमण्डादिकं सकलम् ॥"
उत्पलषष्ठकं यथा,—
"पृश्निपर्णीबलाविल्वधनिकानागरोत्पलैः ।
ज्वरातिसारी पेयां वा पिबेत् साम्लां शृतां नरः ॥"
अत्र लाजमण्डाद्यपेक्षया वाशब्दः । अतिसारे पुरीषातिप्रवृत्त्या साम्लत्वञ्च दाड़िमरसादिना कर्त्तव्यम् । इत्युत्पलषष्ठकम् ॥ * ॥
"कणा करिकणा लाजक्वाथो मधुसितायुतः ।
पीतो ज्वरातिसारस्य तृष्णावम्योश्च नाशनः ॥"
इति कणादिक्वाथः ॥ * ॥
"नागरातिविषामुस्तामृताभूनिम्बवत्सकैः ।
क्वाथः सर्व्वज्वरहरः सर्व्वातीसारनाशनः ॥"
इति नागरादिक्वाथः ॥ * ॥
"गुड़ूच्यतिविषाधान्यशुण्ठीविल्वाब्दवालकैः ।
पाठा भूनिम्बकुटजं चन्दनोशीरपर्पटैः ।
पिबेत् कषायं सक्षौद्रं ज्वरातीसारशान्तये ॥
हृल्लासारुचिछर्द्दिदाहवमीनां विनिवृत्तये ॥"
इति बृहद्गुड़ूच्यादिक्वाथः ॥ * ॥
"उत्पलं दाड़िमत्वक् च पद्मकेशरमेव च ।
पिबेत्तण्डुलतोयेन ज्वरातीसारनाशनम् ॥"
इत्युत्पलादिचूर्णम् ॥ * ॥
विल्ववालकभूनिम्बगुड़ूचीधान्यनागरैः ।
कुटजाब्दयुतः क्वाथो ज्वरातीसारशूलनुत् ॥
इति विल्वादिक्वाथः ॥ * ॥
"नागरातिविषाविश्वागुड़ूचीविल्वमुस्तकैः ।
कषायः पाचनः शोथज्वरातीसारवारणः ॥"
इति नागरादिक्वाथः ॥ * ॥
"दशमूलीकषायेण विश्वामक्षसमां पिबेत् ।
ज्वरे चैवातिसारे च सशोथे ग्रहणीगदे ॥"
इति दशमूलीक्वाथः ॥ * ॥
इति ज्वरातिसाराधिकारः । इति भावप्रकाशः ॥

ज्वरघ्नः, पुं, (ज्वरं हन्तीति । हन् + टक् ।) गुड़ूची । वास्तूकम् । इति राजनिर्घण्टः ॥ ज्वरनाशके, त्रि । (यथा, भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे ।
"ज्वरघ्नं पाचनं बल्यं हृद्यं रुच्यं कफापहम् ॥")

ज्वरहन्त्री, स्त्री, (ज्वरं हन्ति या । हन् + तृच् ङीप् च ।) मञ्जिष्ठा । इति राजनिर्घण्टः ॥ ज्वरघ्नी च ॥

ज्वराग्निः, पुं, (ज्वर एवाग्निः । दाहकत्वादस्य तथात्वम् ।) ज्वररूपाग्निः । तत्पर्य्यायः । आधिमन्थवः २ । इति हारावली ॥

ज्वराङ्गी, स्त्री, (ज्वरमङ्गति विनाशकतया प्राप्नोतीति । अङ्ग गतौ + अच् । गौरादित्वात् ङीष् ।) भद्रदन्तिका । इति राजनिर्घण्टः ॥

ज्वरान्तकः, पुं, (ज्वरस्य अन्तको विनाशकः ।) नेपालनिम्बः । आरग्वधः । इति राजनिर्घण्टः ॥ ज्वरनौषधविशेषः । यथा,—
"भास्करो गन्धकः शर्व्वो देवी विहङ्गतीक्ष्णकम् ।
शोधितं गगनञ्चैव पुष्पकञ्च महेश्वरम् ॥
भूनिम्बादिगणैर्भाव्यं मधुना गुटिका दृढ़ा ।
चातुर्थकं तृतीयञ्च ज्वरं सन्ततकं तथा ॥
आमज्वरं भूतकृतं सर्व्वज्वरमपोहति ॥
अत्र भास्करः ताम्रम् । शर्व्वो रसः । देवी सौराष्ट्रमृत्तिका । विहङ्गं स्वर्णमाक्षिकम् । गगनं अभ्रकम् । पुष्पकं रसाञ्जनम् । महेश्वरं सुवर्णम् । अन्यत् सुगमम् । ताम्रादीनां समभागचूर्णं भूनिम्बादिक्वाथेन भावयेत् । भूनिम्बाद्यष्टादशद्रव्याणि सर्व्वद्रव्यतुल्यानि चतुर्भागावशिष्टं क्वाथं कृत्वा दिनत्रयं विभाव्य विशोष्य मधुना विमर्द्दय अनुरूपं लिहेत् । ज्वरान्तको रसः ।" इति भैषज्यरत्नावली ॥ ज्वरनाशकञ्च ॥

ज्वरापहा, स्त्री, (ज्वरं अपहन्ति नाशयतीति । अप + हन + डः ।) विल्वपत्री । इति शब्दचन्द्रिका ॥ बेलशुँठा इति भाषा ॥ ज्वरनाशके, त्रि ॥

ज्वरारिः, पुं, (ज्वरस्य अरिः शत्रुर्नाशकत्वात् ।) ज्वरघ्नौषधविशेषः । यथा,—
"दरदबलिरसानां शुल्वनागाभ्रकाणां
सुभगविटशिलानां सर्व्वमेकञ्च योज्यम् ।
विपिनवृषदलोत्थे भावितं शोषयेत्तं
दिवसदशसमाप्तौ रक्तिकैकाश्च कुर्य्यात् ॥
एकैकां भक्षयेदस्य चार्द्रकस्य रसैर्युतम् ।
दत्तमात्रं ज्वरं हन्ति ज्वरारिः स निगद्यते ॥
सर्व्वशूलविनाशी च कफपित्तविनाशनः ॥
बलिः । गन्धकः । सर्व्वं शोनालिपत्ररसेन दशदिनं भावयित्वा गुञ्जाप्रमाणमार्द्रकरसेन देयम् । ज्वरारी रसः ।" इति भैषज्यरत्नावली ॥

ज्वराशनिः, पुं, (ज्वरे अशनिर्वज्रमिवामोघत्वात् ।) ज्वरनाशकौषधविशेषः । यथा,—
"रसं गन्धं सैन्धवञ्च विषं ताम्रसमं भवेत् ।
सर्व्वचूर्णसमं लौहं तत्समं चूर्णमभ्रकम् ॥
लौहे च लौहदण्डे च निर्गुण्ड्याः स्वरसेन च ।
मर्द्दयेद्यत्नतः पञ्चान्मरिचं सूततुल्यकम् ॥
पर्णेन सह पातव्यो रसो रक्तिकसम्मितः ।
सर्व्वज्वरहरश्रेष्ठो ज्वराशनिरुदाहृतः ॥
कासं श्वासं महाघोरं विषमाख्यं ज्वरं वमिम् ।
धातुस्थं प्रबलं दाहं ज्वरदोषं चिरोद्भवम् ॥
यकृद्गुल्मोदरप्लीहश्वयथुञ्च विनाशयेत् ॥
ज्वराशनी रसः ।" इति भैषज्यरत्नावली ॥

ज्वरितः, त्रि, (ज्वरः सञ्जातोऽस्य । ज्वर + "तदस्य सञ्जातं तारकादिभ्य इतच् ।" ५ । २ । ३६ । इति इतच् ।) ज्वरी । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते उत्तरतन्त्रे ३९ अध्याये ।
"मुद्गान् मसूरांश्चणकान् कुलत्थान् समकुष्ठकान् ।
आहारकाले यूषार्थं ज्वरिताय प्रदापयेत् ॥"
यथाच,—
"ज्वरितो हितमश्नीयात् यद्यप्यस्यारुचिर्भवेत् ।
अन्नकाले ह्यभुञ्जानः क्षीयते म्रियतेऽथवा ॥"
इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे ॥)

ज्वरी, [न्] त्रि, (ज्वरोऽस्यास्तीति । ज्वर + इनिः ।) ज्वरयुक्तः । (यथा, सुश्रुते उत्तरतन्त्रे ३९ अध्याये ।
"गुर्व्वभिष्यन्द्यकाले वा ज्वरी नाद्यात् कथञ्चन ॥")

ज्वल, ज म चले । त्विषि । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) वकारयुक्तः । ज, ज्वालः ज्वलः । म, प्रज्वलयति । मित्त्वेऽपि नौ ज्वलह्वलह्मल इत्यादिना केवलस्य ह्रस्वविकल्पनात् सोपसर्गस्यैव नित्यं ह्रस्वः । ज्वालयति ज्वलयति प्रज्वलयति । त्विट् दीप्तिः । ज्वलति वह्निः । इति दुर्गादासः ॥ (यथाह कश्चित् ।
"जागर्त्ति लोको ज्वलति प्रदीपः
सखीगणः पश्यति कौतुकेन ।
मुहूर्त्तमात्रं कुरु नाथ ! धैर्य्यं
बुभुक्षितः किं द्विकरेण भुङ्क्ते ॥")

ज्वलः, पुं, ज्वालः । दीप्तिः । (ज्वलतीति । ज्वल दीप्तौ + अच् ।) दीप्तिविशिष्टे, त्रि । इति मुग्धबोधम् ॥

ज्वलका, स्त्री, (ज्वलतीति । ज्वल + बाहुलकात् वुन् ।) अग्निशिखा । इति हेमचन्द्रः ॥

ज्वलत्, त्रि, (ज्वल + शतृ ।) दीप्तिमत् । तत्पर्य्यायः । जमत् १ कल्मलीकिनम् २ जञ्जनाभवन् ३ मल्मलाभवन् ४ अर्च्चिः ५ शोचिः ६ तपः ७ तेजः ८ हरः ९ हृणिः १० शृङ्गाणि ११ । इत्येकादश ज्वलति नामधेयानि ॥ * ॥ भ्राजते १ भाषते २ भास्यति ३ दीदयति ४ शोचति ५ मन्दते ६ भन्दते ७ रोचते ८ ज्योतते ९